दिनांक 15-9-20 उपशास्त्री प्रथम वर्ष, विषय-व्याकरण

ग्रन्थ-सिद्धान्त कौमुदी, तद्धित प्रकरणम्

1 नैषध्यः — निषधानां देशविशेषाणां राजा इति विग्रहे निषध शब्दात् कुरुनादिभ्यो ण्यः इति सूत्रेण ण्य प्रत्यये अनुबन्धलोपे। तद्धितेष्वचामादेः इति वृद्धौ अन्त्यलोपे कृते नैषध्यः इति सिद्धम्।

2 इक्ष्वाकवः — इक्ष्वाकूणां जनपदविशेषाणां राजानः इति विग्रहे जनपदशब्दात् अञ् इति सूत्रेण अञ प्रत्यये अनुबन्धलोपे। तद्धितेष्वचामादेः इति सूत्रेण वृद्धौ, उकारस्य स्थाने ओर्गुणः इति सूत्रेण गुणे अवादेशे ऐक्ष्वाकव इति दशायां। ते तद्राजा इति सूत्रेण तद्राज संज्ञायाम्, तद्राजस्य बहुषु तेनैवास्त्रियाम् इति सूत्रेण अञ प्रत्ययस्य लोपे। एवंप्रकारेण आदि वृद्धि निषेधे, परिणामस्वरूप इक्ष्वाकु शब्दादेव विभक्ति भवति। प्रातिपदिक संज्ञायां विभक्तिकार्ये।

3 कम्बोजः — कम्बोजानां देशविशेषाणां राजा इति विग्रहे, जनपद शब्दात् क्षत्रियाद् अञ् इति सूत्रेण अञ प्रत्यये अनुबन्धलोपे। तद्धितेष्वचामादेः इति सूत्रेण वृद्धौ। काम्बोज इति दशायां कम्बोजात् लुक इति सूत्रे अञ प्रत्ययस्य लोपे तस्मात् वृद्धि निषेधे, कम्बोज शब्दादेव विभक्ति भवति। प्रातिपदिक संज्ञायां विभक्तिकार्ये।

4 रागः — रज्यतेऽनेन इति विग्रहे रञ्ज् धातोः ~~अनात~~ अकर्तरि च कारके संज्ञायाम् इति सूत्रेण घञ् प्रत्यये, घञि च भावकरणयोः इति नकारलोपे, चजोः कु घिण्ण्यतोः इति कुत्वे, उपधावृद्धौ; प्रातिपदिक संज्ञायाम् विभक्तिकार्ये रागः इति सिद्धम्।

अमरनाथ मिश्र
एसो० प्रो० व्याकरण
रा० उ० सं० म० वि० (उज्जैन)

दिनांक 15-9-20

शास्त्री तृतीय खण्ड, विषय- व्याकरण

ग्रन्थ- परमलघुमञ्जूषा

प्रश्न — नैयायिक मीमांसक मतं खण्डयित्वा लक्षणाप्रकरणविषये मञ्जूषाकार मतं विलिख्यताम्। अथवा लक्षणा कः पदार्थः

उत्तर — स्वशक्यसम्बन्धो लक्षणा। सा च द्विधा - गौणी शुद्धा च। स्वनिरूपितसादृश्याधिकरणत्वसम्बन्धेन शक्यसम्बन्धार्थप्रतिपादिका शुद्धा। प्रकारान्तरेणापि सा द्विविधा - अजहत्स्वार्था जहत्स्वार्था च। स्वार्थसम्बलितपरार्थविधायिकाऽजहत्स्वार्था, तेन छत्रिणो यान्ति, कुन्ताः प्रविशन्ति, यष्टीः प्रवेशय, काकेभ्यो दधि रक्ष्यताम्, इत्यादौ छत्रसहितसेना कुन्तास्त्रसहितपुरुष; यष्टिसहितपुरुष काकसहित सर्व दध्युपघातक बोधः।

स्वार्थपरित्यागेनेतरार्थाभिधायिकाऽन्या। तत्परित्यागश्च शक्यार्थस्य लक्ष्यार्थान्वयित्वम्। तेन गौर्वाहीकं पाययेत्यादौ गोसदृश लक्षणायामपि न गोस्तदन्वयि पाठन क्रियान्वयित्वम्। सा च लक्षणा तात्स्थ्यादिनिमित्तिका।

तात्स्थ्यात् तथैव ताद्धर्म्यात् तत्सामीप्यात् तथैव च, तत्साहचर्यात् तादर्थ्याज् ज्ञेया वै लक्षणा बुधैः। ~~तात्स्थ्य~~ तात्स्थ्यात् मञ्चा हसन्ति, ग्रामः पलायितः। ताद्धर्म्यात् सिंहो ~~पलायितः~~ माणवकः, गौर्वाहीकः। तत्सामीप्यात् गङ्गायां घोषः। तत्साहचर्यात् यष्टीः प्रवेशय। तादर्थ्यात् इन्द्रार्था स्थूणा इन्द्रः।

अन्वयाद्यनुपपत्तिप्रतिसन्धानञ्च लक्षणाबीजम्।

वस्तुतस्तु तात्पर्यानुपपत्तिप्रतिसन्धानमेव तद्बीजम्। ~~अन्यथा~~ अन्यथा गङ्गायां घोष इत्यादौ घोषादिपदेष्वेव मकरादिलक्षणापत्तिः स्यात् तादृशान्वयानुपपत्तिपरिहारात्। गङ्गायां पापी गच्छति इत्यादौ गङ्गापदे नरके लक्षणापत्तिश्च।

अस्माकं तु भूतपूर्वपापावच्छिन्नलक्षणात्वे तात्पर्याभावेन न दोषः। नक्षत्रं दृष्ट्वा वाचं विसृजेत् इत्यत्रान्वयसम्भवेऽपि तात्पर्यानुपपत्त्यैव लक्षणा स्वीकारात्। एकानुगमनस्वीकारेण निर्वाहेऽनेकानुगमनस्वीकारे गौरवाच्च।

दिनांक 15-9-20

उपशास्त्री द्वितीय वर्ष, विषय- व्याकरण
ग्रन्थ- सिद्धान्त कौमुदी, अदादिप्रकरणम्

1 आहतुः — ब्रू धातोर्लट् लट्स्थाने तिप्तस्झि इति सूत्रेण तिप् प्रत्यये अनुबन्ध लोपे। सार्वधातुक संज्ञायां, शप् प्रत्यये, अदिप्रभृतिभ्यः शपः इति शपो लुकि। ब्रुवः पञ्चानामादित आहो ब्रुवः इति सूत्रेण तस् स्थाने अतुसादेशे तथा ब्रू स्थाने आह् आदेशे। आह् अतुस् इति दशायां सकारस्य स्थाने रुत्वे विसर्गे।

2 आत्थ — ब्रू धातोर्लट् लट्स्थाने तिप्तस्झि इति सूत्रेण सिप् प्रत्यये अनुबन्ध लोपे। सार्वधातुक संज्ञायाम्, शप् प्रत्यये, अदिप्रभृतिभ्यः शपः इति शपो लुकि, ब्रुवः पञ्चानामादित आहो ब्रुवः इति सूत्रेण सिप् स्थाने थल् आदेशे तथा ब्रू स्थाने आह् आदेशे आह् थ इति दशायां आहस्थः इति सूत्रेण हकारस्य ~~स्थाने~~ स्थाने थकारः ~~आत्थ इति सिद्धम्~~। थकारस्य स्थाने चर्त्वे तकारः आत्थ इति सिद्धम्।

4 ब्रूते — ब्रू धातोर्लट्, लट्स्थाने तिप्तस्झि इति सूत्रेण त प्रत्यये, सार्वधातुक संज्ञायां, शप्, अदिप्रभृतिभ्यः शपः इति शपो लुकि। टित आत्मनेपदानां टेरे इति एत्वे ब्रूते इति सिद्धम्।

5 उवाच — ब्रू धातोर्लिट् लिट् ~~स्थाने तिप्~~ तिप्तस्झि इति तिप् प्रत्यये, परस्मैपदानां णल --- इति सूत्रेण तिप्स्थाने णल् आदेशे अनुबन्ध लोपे। ब्रुवो वचिः इति सूत्रेण ब्रू स्थाने वच् आदेशे, वच् अ इति जाते। लिटि धातोरनभ्यासस्य इति द्वित्वे अभ्यास संज्ञायां हलादिः शेषे, लिट्यभ्यासस्योभयेषाम् इति सूत्रेण अभ्यास वकारस्य स्थाने संप्रसारणे उकारः। अत उपधायाः इति वृद्धौ उवाच इति सिद्धम्।

अमरनाथ मिश्र
एसो० प्रो० व्याकरण
रा० उ० सं० म० वि० रुद्रसेना